संस्कृत प्रवेशिका

(द्वितीयो भागः)

लेखकः—
प्रियव्रतो वेदवाचस्पतिः

प्रथमावृत्तिः १००० | सं० १९८९ | मूल्य

ञ्चिदपि शाखायामप्रदर्श्यैव जीवनप्रभात एव देवभयमभ्युपगतः ।

ओ३म्

द्वित्राः शब्दाः ।

प्रथममेव संस्कृताभ्यासमारब्धवतां विद्यार्थिनां कृते समुपयोगि पुस्तकानामभावो गुरुकुले तद्भाषाध्यापकैश्चिरका-लादनुभूयते स्म । अभावमिममपाकर्त्तुं गुरुकुल मुख्याधिष्ठा-तृभिः गुरुकुल स्नातकेष्वन्यतमः संस्कृत भाषायाः पारवेत्ता पण्डितः श्री हरिश्चन्द्रो विद्यालङ्कारः समादिश्यत । तेन हि विदुषा "संस्कृत प्रवेशिकाऽऽ"ख्या पाठावलीनां माला मुख्याधिष्ठातृणां नियोगमनुपालयता निर्मातुमारब्धा । यस्याः प्रथमो भागः गुरुकुलाधिकारिभिः प्राकाश्यं नीत्वाऽध्ययना-ध्यापनपदवीमारोपितो वर्तते । 'प्रवेशिकायाः" इमं प्रथमं भागमवलोकयतः मालेयंचेत् समग्रा पूर्तिमनेष्यत महान् संस्कृताभ्यासमारिप्सूनामुपकारो ऽभविष्यदिति मनसि सुस्थिरं भवति । परं संस्कृतोत्सुकानामभाग्यान्मालेयं तेन श्रीमता रचयितुं नापार्यत नैकदुर्निवारकारणवशवर्तितया । अद्य पञ्चदशतोप्यधिका भवन्ति वर्षाः प्रकाशितस्य प्रथम भागस्य । "प्रवेशिका" लतायां प्रथम कुसुमोद्गमानन्तरम् न व्यलसत् किमपि प्रसूनान्तरम् । अस्मिन्नन्तरे हरिवर्षयात्रायामसौ पण्डित प्रवरः स्वप्रचण्डप्रतिभायाश्चमत्कारं साहित्यविटपिनः कस्या-श्चिदपि शाखायामप्रदर्श्यैव जीवनप्रभात एव दैवभयमभ्युपगतः ।

"संस्कृतप्रवेशिकायाः" प्रथमं भागमन्वागतवति काले भारतस्य विविधप्रान्तवर्तिभिः संस्कृत शिक्षां सुखग्रहणां सम्पादयितुमिच्छद्भिः पण्डितवर्यैः तास्ताः पाठानामवल्यो निर्माय प्रकाश्यमानीताः। प्रायस्ताः सर्वा एव गुरुकुलसंचालकै-र्यथाक्रमं यथावकाशं च गुरुकुलीय पाठनपद्धतिं प्रवेशिताः तत्रत्याध्यापकानां मनांसि नाविशन् । ताः सर्वा बालानाम-नुपयोगिन्य इति भृशं तैरुद्घोषिताः। क्वचिद्भाषाकृतं क्वचिद्वि-चारकृतं च काठिन्यं तासु सर्वत्राप्यन्वभूयत । भाषया सरलताया विचारैश्च स्थूलतमैर्बालबुद्धिप्रवेशयोग्यैर्भाव्यमिति तेषामासीत् सर्वेषां मतम् । क्रमेण च भाषा काठिन्यं भजमाना विचाराश्च सूक्ष्मतामधिगच्छन्तो भवेयुः । संस्कृतशिक्षोपक्रम एव बालकाः सन्धिसमासजङ्गलेषु विभ्रान्त मतयो न जायेरन् । बालानां वांछितस्य पूर्तिमावहन्ती यदा कापि पाठावलिर्नाधिगता तदा गुरुकुलस्य साम्प्रतिकमुख्याधिष्ठा-तृभिरहमस्य गुरुणः कर्मण उद्वहने समादिष्टः । मया च तदाज्ञां शिरसि धारयता बहुभ्यः वर्षेभ्यः प्राक् प्रारब्धायाः संस्कृतप्रवेशिकाख्यमालाया अयं द्वितीयो भागः अध्यापका-ध्येतॄणां पुरः समुपन्यस्यते। सन्धिसमासयोस्तु मयात्र प्रायः सर्वथैव परित्यागः स्वीकृतः । क्वचित् क्वचित् 'तथापि' 'यद्यपि' 'नापि' 'विद्यालयः' 'पाठशाला' इत्येवमादिषु संधि-समासौ समाहृतौ यत्र सन्धि समासभांजि पदानि अविभज्यैव एकपदत्वेन बालाः बोधयितुं शक्यन्ते। अन्यविधमपि काठिन्यं

भाषा मा गादिति भृशमायतितम् । विचारजन्य काठिन्यस्य परिहरणेपि सततं विविहितः समुद्योगः। साफल्यं तु मया कियदवाप्तमात्मप्रयत्न इति वेत्तार एव कथयिष्यन्ति । तृतीयादिभागानामपि चेन्मालाया अस्या निर्माणमस्यैव विदुषां वशंवदस्य भागधेयं विधिवशादुपजायते, द्रक्ष्यन्ति तत्र पाठकाः क्रमेणारोहं भाषाविचारयोः काठिन्यस्य ।

एतत्पाठावलि पाठनरीतिः

अत्र केचिच्छब्दा अस्याः पुस्तिकाया अध्यापकान् प्रत्युक्ता मन्ये नानुपयुक्ता भविष्यन्ति । भवति महदन्तरमध्यापने ऽध्यापने च । विज्ञो हि पाठयिता कतिपयपाठानेवान्तेवासिनः सम्पाठ्याऽल्पेनैव कालेन तावतो निपुणान् संस्कृतज्ञाने विदधाति यावन्तोध्यापन रीत्यनभिज्ञेन पाठयित्राऽशेषामपि पाठावलीं समाप्य ते न शक्या विधातुम् । अध्यापनस्य सैव सुबोधसरणिरिमामपि पाठावलिमन्तेवासिनोध्यापयद्भिस्तैः समादर्तव्या । सा चेयम् । (१) यदाप्येकः पाठोध्यापितो भवेत्, छात्राश्च तदन्तर्गतानां पदानां वाक्यानाञ्चार्थान् स्वमातृभाषया प्रतिवक्तुं समर्थाः संजायेरंस्तदाऽध्यापकेन स्वकर्तव्यं परिसमाप्तमिति न मन्तव्यम्। बह्वत्रशिष्यते तस्मिन्नेव पाठे यदध्यापयित्राऽद्यापि सम्पादनीयम् । संस्कृतस्य पदवाक्यानामर्थान् स्वमातृभाषया प्रतिवक्तुं विद्यार्थिनः प्रायोऽल्पेनैवायासेन समर्था भवन्ति । परन्तु पाठयित्रा तेषां मातृभाषायां प्रष्टानां पदवाक्यानां संस्कृत

प्रतिरूपप्रदाने न ते तावताऽल्पेनायासेन शक्ता भवन्ति। "सूर्यः प्राच्यां दिशि उदयते" इत्यस्य संस्कृत वाक्यस्य "सूर्य पूर्व दिशामें उदय होता है" इति भाषार्थं तेऽल्पेन यत्नेन स्मर्तुं पारयन्ति। परं "सूर्य पूर्व दिशा में उदय होता है" इति भाषावाक्यस्याध्यापकेन संपृष्टस्य "सूर्यः प्राच्यां दिशि उदयते" इति संस्कृतोत्तरं प्रदातुं ते महान्तमभ्यासमपेक्षन्ते। तदध्यापकेन प्रथमन्तावदिदं प्रष्टव्यं यच्छात्राः संस्कृत पदवाक्यानां स्वमातृभाषायां तेषाञ्च पुनः संस्कृत भाषायामनुवादं यथोचितं विधातुं कल्पन्ते। यावदिदं न संभवति तावदग्रिमः पाठो न पाठयितव्यः (२) द्वितीयतश्चाध्यापकेनेदं प्रष्टव्यं यद्विद्यार्थिनः पाठे पठितानां पदानां सम्बन्धम् पाठस्थपदसम्बन्धञ्च हृदयङ्गमं संविधातुं प्रभवेयुः। एतत्फलोपलब्ध्यै तेन छात्रा भूयसः प्रश्नान् प्रष्टव्याः। तथा हि प्रथमं पाठमध्याप्य पाठयिता छात्रान् पृच्छेत् :— अध्या०— 'सूर्यः कस्यां दिशि उदयते।' बालका उत्तरेयु :— 'सूर्यः पूर्वस्यां दिशि उदयते।' अध्या० —'पूर्वस्यां दिशि कः उदयते।' बालकाः—'सूर्यः पूर्वस्यां दिशि उदयते।' अध्या०—'सूर्यः पूर्वस्यां दिशि किं कुरुते।' बालकाः—'सूर्यः पूर्वस्यां दिशि उदयते।' अध्या०—'सर्वे कस्य उदये स्वकर्माणि कुर्वन्ति।' बालकाः-- सर्वे सूर्यस्य उदये स्व कर्माणि कुर्वन्ति।' अध्या०:— 'सूर्यस्य उदये सर्वे किं कुर्वन्ति।' बालकाः— सूर्यस्य उदये सर्वे स्व कर्माणि कुर्वन्ति अध्या०—'तस्य कस्य ? बालकाः :— 'सूर्यस्य।' अध्या०—

'तस्मिन् कस्मिन् ?' बालकाः— 'सूर्ये।' अध्या०— ओषधयः कस्य प्रकाशेन पच्यन्ते।' बालकाः—'ओषधयः सूर्यस्य प्रकाशेन पच्यन्ते।' अध्या०—ओषधयः सूर्यस्य प्रकाशेन किं कुर्वन्ति।' बालकाः— 'ओषधयः सूर्यस्य प्रकाशेन पच्यन्ते।' अध्या०— सूर्यस्य उदये के प्रबुध्यन्ते। बालकाः—'सूर्यस्य उदये साधवः बालाः प्रबुध्यन्ते।' अध्या०— 'साधवः बालाः सूर्यस्य उदये किं कुर्वन्ति।' बालकाः— 'साधवः बालाः सूर्यस्य उदये प्रबुध्यन्ते।' एवमादीन् बहून् प्रश्नान् प्रथम एवं पाठे छात्रान् पृच्छेत् समुचितोत्तरप्रदाने च तान् प्रेरयेत्। एवमेवाग्रिमेषु पाठेषु प्रत्येकं पाठे। (३) तृतीयतश्च यदा कतिपये पाठा अध्यापिता भवेयुस्तदा प्रभिन्नपाठेभ्यः पदान्यादाय वाक्यं निर्मिमीत निर्माय, च तच्छात्राणां पुरतो न्यस्येदस्य वाक्यस्य स्वभाषायामर्थं दत्तेति। तथाहि, "गोपालः सूर्यस्य उदये क्रीड़ायै अगच्छत्" इति वाक्यमध्यापको दद्यात् "गोपाल सूर्योदय के समय खेल के लिये जाता था" इति भाषायां प्रत्युत्तरं छात्रा दद्युः। "स सूर्यस्य उदये पाठं न अस्मरत्" इत्यध्यापकः पृच्छेत् "वह सूर्योदय के समय पाठ को नहीं याद करता था" "इति छात्रा भषायामुत्तरेयुः। एवमेव भाषायां निर्माय पृष्टानां वाक्यानामनुवादं बालाः संस्कृत भाषायां विदध्युः। "सूर्य के अस्त होने पर गोपाल ने एक चिड़िया को देखा।" इत्यध्यापयिता ऽनुयुञ्ज्यात् "सूर्ये अस्तं गते गोपालः एकां चटकाम् अपश्यत्" इति छात्राः संस्कृते-

ऽनुवदेयुः । एवमेव प्रत्यहं बहूनि वाक्यानि छात्राणां समक्ष-मुपन्यस्येत् । (४) चतुर्थतश्चेमां पाठावलिमध्यापयताध्यापकेन कतिपयानामत्युपयोगिशब्दानां धातूनाञ्च रूपाणि बालाः सर्वविभक्तिषु प्रबोध्याः वाच्यमानपाठेषु सम्पातिनां शब्दधातुनां रूपाणि साम्येन निर्दिशेदस्य शब्दस्यास्य धातोश्च रूपाण्यमुक शब्दस्यामुकधातोश्च रूपाणीव भवन्तीति । बालाः साम्येन नव शब्दानां रूपाणि वक्तुं प्रभवन्ति नवेत्यपि काले काले परीक्षेत । शब्दधातूनां विभक्त्यर्थान् अपि बालाः सामान्येन सम्यक् प्रबोधनीया येन पाठान्तःपाति पदानां पारस्परिकं सम्बन्धं ते हृदयङ्गमं संविधातुं प्रभवेयुः ।

इमांश्चतुरो नियमाननुसृत्य चेदियं पाठावलिरध्याप्येताऽसमग्राऽपि सती पाठिता महान्तमुपकारं विधेयानामातनुयात् ।

गुरुदत्त भवन
लाहौर

प्रियव्रतो वेदवाचस्पतिः
४ – ६ – १९८८ वि०

संस्कृतप्रवेशिकाया द्वितीय भागस्य

विषय सूचिका

द्वितीय भाग।

॥ ओ३म् ॥

संस्कृत-प्रवेशिका

द्वितीयो भागः ।

प्रथमः पाठः ।

सूर्यः ।

सूर्यः पूर्वस्यां दिशि उदयते । तस्य उदये सर्वाः दिशः ज्योतिषा प्रकाशन्ते । मनुष्याः पशवः पक्षिणः सर्वे तस्य उदये स्वकर्माणि कुर्वन्ति । तस्य प्रकाशं विना कोपि किमपि कर्तुं न शक्नुयात् । तस्य प्रकाशेन घर्मेण च ओषधय प्ररोहन्ति पच्यन्ते च । पक्कानाम् ओषधीनां भोगेन वयं जीवामः । स पश्चिमस्यां दिशि अस्तमयते । तस्मिन् अस्तं गते सर्व जगत् तमसि लीयते । साधवः बालाः सूर्यस्य उदये प्रबुध्यन्ते । प्रबुध्य परमेश्वरं नमन्ति ।

द्वितीयः पाठः

क्रीडनः कुमारः। (क)

गोपालः कदापि पठने रुचिं न अकरोत्। स सदा चिरेण विद्यालयं गच्छति स्म। पठितं पाठं च कदापि सम्यक् न अस्मरत्। स एकदा प्रभाते बहु चिरेण प्रबुद्धः। यदा स प्रबुद्धः तदा तस्य सर्वे सहपाठिनः विद्यालयं गता अभूवन्। स तस्मिन् दिने विद्यालयं न अगच्छत्। क्रीडायै गृहात् निर्गतः।

क्रीडायै कंचित् सहायं अन्वेष्टुकामः कस्यचित् वृक्षस्य अधस्तात् एकां चटकाम् अपश्यत्। ताम् अवलोक्य अवदत् चटके आगच्छ क्रीडावः। चटकया कथितम् अहं न क्रीडामि। मम शिशवः सन्ति। तेषां भोजनाय कणान् आचिनोमि। अहं अलसवत् समयम् अतिवाहयितुं न शक्नोमि। तस्मात् अन्यं कंचित् क्रीडायै सहायम् अन्विष।

तृतीयः पाठः।

क्रीडनः कुमारः (ख)

चटकया एवम् उक्तः गोपालः मार्गे तण्डुलस्य कणाम् आदाय गच्छन्तीं पिपीलिकाम् एकाम् अपश्यत्। पिपीलिकायाः सकाशं गत्वा अवदत् भद्रे आगच्छ मया सह क्रीडने सहाया भव। येन केचित् क्षणाः आनन्देन अतिवाहिताः भवेयुः। गोपालस्य भाषितं श्रुत्वा पिपीलिका अकथयत् बालक! न अहं त्वया सह क्रीडितुम् इच्छामि। एषः समायाति वर्षासमयः यस्मिन् अस्माकं संचारः सर्वथा रुद्धः भविष्यति। वर्षाणां समये भक्षणाय वयं सर्वाः पिपीलिकाः तण्डुलान् संचिनुमः। तत् कंचित् अन्यं क्रीडायाः सहायम् अन्विष।

निराशः गोपालः पुष्पात् पुष्पं निषीदन्तीं मधुमक्षिकाम् अपश्यत्। तस्याः सकाशं गत्वा तामपि क्रीडायै आह्वयत्। तया विहस्य उक्तम् अयि बाल! क्रीडायाः अयं कालः?

न पश्यसि किं मां मधु संचिन्वतीम् ? यदि अहं क्रीडार्थिनी मधु न संचिनुयाम् तर्हि अन्याः मक्षिकाः मधुकोशात् मह्यं भागं न दास्यन्ति। तस्मात् अहं कर्मणि संलग्ना क्रीडायां वृथा समयं न यापयितुं शक्ता । अन्यं कमपि सहायं लभस्व ।

मधुमक्षिकया अपि एवम् उक्तः गोपाल अचिन्तयत्—अस्मिन् जगति सर्वे जन्तवः कर्माणि कुर्वन्ति । केवलम् अहम् एव निष्कर्मा भ्रमामि । ततः प्रभृति स सदा पठने रुचिम् अकरोत् ।

चतुर्थः पाठः।

सतां सङ्गः।

कश्चित् पान्थः वनमार्गेण गच्छति स्म। गच्छता तेन पार्श्ववर्तिनः कस्यचित् वृक्षस्य शाखा छिन्ना। स यदा तया शाखया युक्तं हस्तम् अकस्मात् स्वनासिकायाः समीपम् अनयत् तदा तेन तस्यां मनोहरः गन्धः अनुभूतः। तं मनोहरं गन्धम् अनुभूय असौ अचिन्तयत् अहो कीदृशः मनोहरः गन्धः अस्यां शाखायां विद्यते। एवंविधः गन्धः कदाचित् पूर्वम् तु मया अस्य वृक्षस्य न दृष्टः। तत् अनेन अयं मनोहरः गन्धः कुतः प्राप्तः। आत्मनः सन्देहस्य निवारणाय स तं वृक्षमेव अपृच्छत्।

वृक्षः अकथयत् भोः पान्थ भवता मम गन्धम् आघ्राय आश्चर्यम् न कर्तव्यम्। बहुभ्यःवर्षेभ्यः प्राक् अत्र एकः चन्दनस्य वृक्षः अभवत्। तस्य चन्दनस्य मनोहरेण गन्धेन

कथं गन्धेन हीनाः अपि गन्धवन्तः अभवाम । तेन भवान् मयि इमं मनोरमं गन्धम् जिघ्रति।

गुणैः हीनाः अपि पुरुषाः गुणवद्भिः सहवासेन गुणवन्तः भवन्ति । छात्रैः सदा गुणवद्भिः सह वासः कर्तव्यः ।

पंचमः पाठः।

लेखकः।

कश्चित् ग्रामीणः कस्यचित् लेखकस्य समीपं गत्वा तं मह्यं पत्रम् एकं लिख इति प्रार्थयत्। लेखकेन उत्तरं दत्तं मम पादे वेदना वर्तते अतः अन्यः कश्चित् लेखकः अन्विष्यताम्। ग्रामीणः अपृच्छत् अहं भवन्तं क्वचित् गमनाय न कथयामि तत् मम पादे वेदना इति किम् उत्तरम्! लेखकः अवदत् मम लिखितस्य पठनाय जनाः माम् एव आह्वयन्ति अतः मया उक्तं मम पादे वेदना भवति इति।

किंचित् कर्म कर्तुम् अनिच्छन् जनः यं कमपि व्याजं प्रत्युपानयति। साधुना पुरुषेण स्पष्टम् एव कथनीयम् अहम् एतत् कर्म कर्तुं न इच्छामि इति। व्याजस्य उपरि व्याजः न प्रत्युपानेतव्यः।

षष्ठः पाठः ।

चौरः ।

कश्चित् चौरः कस्मिंश्चित् फलोद्याने आम्रवृक्षम् आरुह्य आम्राणि चोरयति स्म । अस्मिन् एव अन्तरे उद्यानस्य स्वामी तत्र आगच्छत् । फलानि च आददानं चौरम् अवलोक्य स्वामिना पृष्टं कुतः रे वृक्षम् आरुह्य आम्राणि चोरयसि ? चौरः अवदत् अहम् अत्र आरूढः फलानि न चोरयामि अपि तु गवाम् अर्थे तृणानि अन्विषामि । अन्ध ! कुतः अत्र तृणानि इति क्रुद्धेन स्वामिना पृष्टः असौ वृक्षात् अवातरत् । अवतीर्य स्वामिनम् अकथयत् अस्मिन् आम्रतरौ न तृणानि इति अवेक्ष्य एव अहम् अवतीर्णः अस्मि ।

एवम् असंबद्धं प्रलपन् चौरः अयम् इति स्वामिना ज्ञात्वा भृशं दण्डितः ।

सप्तमः पाठः।

वाग्गुदः।

एकदा पशूनां पक्षिणां च मिथः युद्धं बभूव। तत्र वाग्गुदेन न पशूनां पक्षः आश्रितः नापि पक्षिणाम्। अथ पशवः युद्धे विजयिनः अभूवन्। वाग्गुदः पशून् गत्वा अवदत् अहं युष्माकं पक्ष्यः अस्मि। पश्यत मम पशूनाम् इव दन्ता सन्ति। अथ युद्धे पक्षिणां विजयः अभूत्। वाग्गुदः पशून् विहाय पक्षिणां सकाशं अगच्छत् गत्वा च तान् अवदत् अहं न पशुषु भवामि। अहं तु पक्षिणामेव अन्यतमः अस्मि। पक्षिणः आकाशे पतन्ति। अहमपि आकाशे पतामि। एवं तेन न पक्षिणां पक्षः ध्रुवम् आश्रितः नापि पशूनाम्।

पशवः पक्षिणः न तस्मै अद्रुह्यन् नापि अस्निह्यन्। स कस्य अपि पक्षस्य प्रियः न अभवत्। अतः एव आत्मनः तेन भीरुणा कर्मणा लज्जितः वाग्गुदः दिवा पशूनां पक्षिणां वा समक्षं न भवति। रात्रौ सर्वेषु सुप्तेषु बहिः चरति।

अष्टमः पाठः।

चन्द्रमाः।

रात्रौ चन्द्रमसः प्रकाशः कियान् रोचते। चन्द्रमसि उदिते रात्रेः सर्वः अन्धकारः विनश्यति। चन्द्रमसः प्रकाशः सूर्यस्य प्रकाश इव तीव्रः न भवति। सूर्यं प्रति कश्चित् अपि चिरं द्रष्टुं न शक्नोति। चन्द्रमसं प्रति तु शिशुः अपि प्रेम्णा चिरं द्रष्टुं शक्तः। शिशुभ्यः चन्द्रमाः भृशं रोचते। शिशवः रात्रौ चन्द्रमसम् आदातुम् पुनः पुनः हस्तौ उद्यच्छन्ति। परं तस्य दूरत्वात् तं स्प्रष्टुं न शक्नुवन्ति। चन्द्रस्य प्रकाशः चन्द्रिका इति कथ्यते। निर्मलायां रात्रौ पूर्णस्य चन्द्रमसः चंद्रिकाम् अवलोक्य एवं प्रतीयते यत् आकाशः दुग्धं वर्षति। नद्याः तीरे स्थित्वा चन्द्रमसः चन्द्रिकायाः च अवलोकनम् अतीव मनोरमं भवति। मह्यं तु सूर्यात् चन्द्रः अधिकं रोचते।

नवमः पाठः ।

नद्यः ।

नद्यः पर्वतेभ्यः प्रभवन्ति । ह्रस्वाः नद्यः दीर्घाभिः नदीभिः संगच्छन्ते । दीर्घाः नद्यः ह्रस्वाः नदीः आदाय अन्ततः समुद्रेण संगच्छन्ते । नदीभ्यः कुल्याः संचार्यन्ते । कुल्यानां जलेन कृषिः सिच्यते । सेचनेन कृषिः प्रभूतम् अन्नं जनयति । अन्नं संभुज्य वयं जीवामः । नद्यः वाणिज्याय अपि बहु उपयोगिन्यः भवन्ति । नौकासु विक्रेयाणि वस्तूनि आरोप्य नद्याः वेगेन देशात् देशं नीयन्ते । वर्षासु नदीनां जलं वेगः च बहु वर्धते । तदानीं तासां जलं बहु मलिनम् अपेयं च भवति । वर्षासु नद्यः महतः वृक्षान् अपि उत्पाट्य समुद्रं नयन्ति । युष्माभिः कदाचित् वर्षाणां समये गंगा दृष्टा भवेत् । तदानीं तस्याः जलस्य वेगः दर्शकानां मनःसु भयं जनयति । परं तरणे प्रवीणाः वीराः बालाः तदानीम् अपि तस्याम् आनन्देन

तरन्ति । ग्रीष्मे हेमन्ते च नदीनां जलम् अल्पं भवति । तस्य वेगः अपि मन्दः जायते । जलं निर्मलं पेयं च सम्पद्यते ।

भारतस्य प्रसिद्धाः नद्यः गंगा-यमुना-सिन्धु- नर्मदा—गोदावरी ब्रह्मपुत्राः सन्ति ।

दशमः पाठः

लेखनी।

रामः—अयि जानासि हरिदत्त ! मम हस्ते किम् इदम् ?

हरिदत्तः—आम् जानामि ।

रामः—तर्हि कथय किम् इदम् ?

हरिदत्तः—तव हस्ते लेखनी वर्तते ।

रामः—माम् आत्मनः लेखनीं दर्शय ।

हरिदत्त—इयम् अस्ति मम लेखनी, गृहाण।

रामः—तव लेखन्याः फलकं तु लोहमयं वर्त्तते । मम लेखनी तु सर्वा अपि नडस्य खण्डात् निर्मिता ।

हरिः—आत्मनः लेखनीं दर्शय।

रामः—पश्य।

हरिः—तव लेखन्याः लेखनाय फलकं कः करोति ?

रामः—मम गुरुः च्छुरेन फलकं करोति । तव फलकं कः करोति ?

हरिः—इमानि फलकानि तु कर्मान्तेषु लोहकाराः कुर्वन्ति।

रामः—तव लेखन्याः तु सञ्ज्नी अपि अति मनोरमा। इयं कुतः उपलभ्यते।

हरिः—सञ्ज्न्यः अपि कर्मान्तेषु निर्मीयन्ते तक्षभिः। परं त्वं तु फलकेन युक्तां सञ्ज्नीं लेखनीभूतां विपणौ कस्मिंश्चित् आपणे क्रेतुं शक्नोषि।

रामः—अहम् अपि श्वः त्वयासह विपणिं गत्वा आपणात् एकां तव लेखनी सदृशीं लोहस्य फलकवतीं लेखनीं क्रेष्यामि। एषा मह्यं बहु रोचते।

हरिः—बाढम्।

एकादशः पाठः।

वर्षादिवसः।

अहो अद्य कियान् रमणीयः दिवसः वर्त्तते। दिशाम् अन्तेभ्यः आगत्य मेघैः सर्वम् अन्तरिक्षं व्याप्तम्। मेघानां विविधान् रागान् पश्यत। श्यामानां मेघानाम् अभ्यन्तरे द्योतमाना विद्युत् अपूर्वां शोभां दर्शयति। मेघानां स्तनितम् अपि आकर्णय। कदाचित् कदाचित् तु मेघानां स्तनितस्य तारता कर्णौ स्फोटयन्ती इव प्रतीयते। परं मेघस्य मन्दं स्तनितं तु हृदयम् आकर्षति। मन्ये अल्पेन कालेन एव वर्षाः भविष्यन्ति। जलस्य भारेण मेघः संनतः इव अवलोक्यते। अद्य वर्षासु स्नास्यामः। महान् आनन्दः भविष्यति। पश्यत मेघस्य गर्जनम् अनु मयूराः कूजन्ति नृत्यन्ति च। मह्यं नृत्यतां मयूराणां दर्शनं अतीव रोचते। एषः मेघः वर्षितुम् आरब्धः। आगच्छ स्नामः। अहो वर्षाभिः सह करकाः अपि पतन्ति। अधुना युष्मासु वर्षासु स्नातुं कः उद्यतः। वयं सर्वे उद्यताः स्मः।

द्वादशः पाठः ।

वर्गः ।

उपाध्यायः— ब्रूहि भूमित्र ! युष्माकं वर्गे कति ब्रह्मचारिणः पठन्ति ।

भूमित्रः—गुरुवर्य ! अस्माकं वर्गे विंशतिः ब्रह्मचारिणः पठन्ति ।

उपाः—भोः बालाः ! यूयं सर्वे आत्मनः पुस्तकानि दर्शयत ।

बालाः—इमानि सन्ति ।

उपाः—विश्वदेव ! तव पुस्तकानि क्व सन्ति ।

विश्व—गुरो ! अहं तु अद्य गृहे एव स्वपुस्तकानि व्यस्मरम् ।

उपा—एतत् तव कर्म महत् अनुचितम् । पुनः यदि पुस्तकानि विस्मरिष्यसि दण्डं प्राप्स्यसि । अद्य त्वां मुञ्चामि । सहदेव ! त्वम् आत्मनः मसीगर्भां दर्शय ।

रुद्रः—उपाध्याय इयम् अस्ति मम मसीगर्भा ।

उपा:—त्वम् आत्मनः लेखनीं मसीपात्रं च आनीतवान् असि नवा ?

रुद्रः—इयम् अस्ति मम लेखनी इदं च मम मसीपात्रम् ।

उपाः—अहं कृष्णफलके कानिचित् अक्षराणि खटिकया लिखामि । युष्माभिः तानि अक्षराणि प्रस्तरपट्टिकासु लेखनीयानि ।

भूदेवः—मम पार्श्वे प्रस्तरपट्टिका न अस्ति ।

उपा:—तर्हि त्वं काष्ठपट्टिकायां लिख ।

देवशर्मा—अहम् आत्मनः प्रस्तरलेखनीं गृहे व्यस्मरम् ।

उपा:—विष्णुमित्र ! देवशर्मणे आत्मनः प्रस्तरलेखनीं देहि ।

विष्णु—एष ददामि ।

उपा:—अद्य सर्वैः समीचीनं लिखितम् । अद्य युष्मासु भृशं प्रसीदामि । सम्प्रति अध्ययनस्य समयः अतीतः । स्वानि पुस्तकानि कोशेषु वेष्टित्वा लेखनीः मसीगर्भाः मसीपात्राणि च लेखन्याधानेषु संस्थाप्य गृहाणि गच्छत ।

त्रयोदशः पाठः ।

लुब्धः श्वा ।

एकदा कश्चित् कुक्कुरः मुखे अपूपम् आदाय कस्याश्चित् नद्याः सेतुं प्राप्तः । नद्याः पारे गमनाय तेन सेतुं आरूढेन जले आत्मनः प्रतिविम्बम् अवलोकितम् । तत् अवलोक्य असौ अचिन्तयत्—अहो अयम् अपरः श्वा मुखे अपूपम् आदाय गच्छति । अस्य मुखात् अपूपं आच्छिनद्मि । तस्मिन् गृहीते सति मम द्वौ अपूपौ भविष्यतः । एवं विचार्य असौ आत्मनः प्रतिविम्बम् अपरं कुक्कुरं मन्यमानः मुखं व्यादाय उत्प्लुत्य नद्यां पतितः, जलस्य वेगवशाच्च मृत्युं प्राप्तः ।

एवम् अति लुब्धेन तेन शुना अपरस्य अपूपस्य प्राप्तेः इच्छया आत्मनः अपूपेन सह स्वप्राणाः अपि नाशिताः ।

चतुर्दशः पाठः ।

अन्धालातयोः

कश्चित् अन्धः रात्रौ हस्ते अलातम् आदाय गच्छति स्म । तं कश्चित् पार्श्वस्थः अपृच्छत् । अयि भोः न तव कश्चित् रात्रेः दिनस्य वा विशेषः । तस्मात् किमर्थं इदम् अलातं हस्ते वहसि । अन्धः उदतरत् अहं आत्मनः अर्थे अलातं न वहामि । अपि तु तव प्रकाशाय । त्वं अन्धकारे मया न विघट्टयेः इति अलातं गृह्णामि । अन्यथा त्वं मम पात्रं भञ्जयेः ।

पंचदशः पाठः।

पर्वतः।

पृथिव्या अति उन्नतः भागः पर्वत इति कथ्यते। केषुचित् पर्वतेषु शिलाः बहुला भवन्ति केषुचित् च शर्कराः। पर्वतेषु वनानि अपि बहूनि भवन्ति। बहुषु पर्वतेषु बहवः निर्झराः प्रस्रवन्ति। गंगा-यमुना-प्रभृतयः नदयः पर्वतेभ्य एव प्रभवन्ति। नदीनां जलेन कियान् उपकारः जायते इति यूयं जानीथ। पर्वतेषु जायमानानि वनानि अपि महान्तम् उपकारं कुर्वन्ति। अस्माकं गृहाणां निर्माणे यानि काष्ठानि प्रयुज्यन्ते तानि प्रायः पर्वतेभ्य एव आनीयन्ते। केचित् पर्वताः अति उन्नता भवन्ति। तेषां शिखराणि सदा हिमेन आच्छन्नानि भवन्ति। ग्रीष्म समये पर्वतेषु भ्रमणं महत् आनन्दकरं भवति। अनेके जनाः ग्रीष्म समये द्वित्रेभ्यः मासेभ्यः पर्वतेषु निवासार्थं गच्छन्ति। तत्र ग्रीष्मस्य घर्मः न सन्तापयति। रसनाय च स्वादूनि फलानि लभ्यन्ते।

पर्वतेषु सिंहप्रभृतयः हिंस्त्र जन्तवः अपि भवन्ति। तेभ्यः आत्मनः रक्षार्थं जनाः नलिकं सह नयन्ति। किं युष्माभिः कदाचित् पर्वतेषु भ्रमणं कृतं तत्र प्रियालानि च आस्वादितानि।

षोडषः पाठः ।

पठनः कुमारः ।

कृष्णः सूर्यस्य उदयात् प्राक् प्रबुध्यते स्म । प्रबुध्य दीपं प्रज्वाल्य तस्य प्रकाशे कंचित् कालं पाठं स्मरति स्म । ततः सूर्ये उदिते स्नात्वा ईश्वरस्य उपासनां अकरोत् । अत्रान्तरे तस्य माता तस्मै प्रातराशं निर्वर्तयति स्म । स प्रातराशं कृत्वा विद्यालयम् अगच्छत् । तत्र उपध्यायः पूर्वेद्युः पठिते पाठे प्रश्नान् अकरोत् । कृष्णः उपाध्यायस्य सर्वेषां प्रश्नानां समाधानं सम्यक्तया अकरोत् तेन उपाध्यायस्य कृष्णे प्रीतिः प्रतिदिनम् अवर्धत । अन्ये विद्यार्थिनः तु उपाध्यायस्य प्रश्नान् सम्यक्तया न उदतरन् । तेन ते उपाध्यायस्य प्रियाः न अभवन् । उपाध्यायस्य प्रीतिम् इच्छता बालेन सदा पठने यत्नः कार्यः ।

सप्तदशः पठः।

पिपीलिका।

कापि तन्वी पिपीलिका पथि गच्छन्ती तण्डुलम् एकम् अलभत। सा हि गुरुत्वात् तं तण्डुलं स्वयम् उत्थापयितुं लोठयितुं वा न अशकत्। अतः प्रातिवेशिकीं पिपीलिकाम् अवदत्—भद्रे! अहं हि अस्य तण्डुलस्य गुरुतया इमं नेतुं न शक्नोमि। भवती अस्य नयने साहाय्यं दातुं प्रसीदतु। सा अवोचत्—मम क्षिप्रं करणीयं अन्यत् कार्यम् अस्ति। अतः अहं तव सहायतायाः दानेन जायमानं विलम्बं सोढुं न शक्ता। अतः भवती मम असमर्थतां क्षमताम्।

तस्याः मनः स्वभावतः कुटिलम् आसीत्। अथ अपरा पिपीलिका तेन मार्गेण गच्छति स्म। सा तु तण्डुलस्य पार्श्वे तिष्ठन्तीं पिपीलिकाम् अवलोक्य दर्शनेन एव इयं साहाय्यम् इच्छति इति अजानात्। तस्याः पार्श्वे

उपसृत्य अवोचत्—भद्रे किमर्थं विषण्णा तिष्ठसि ? अस्ति चेत् किमपि मम करणीयं तर्हि कथय । तण्डुलस्य आत्मनः बिलपर्यन्तं नयने सहायताम् इच्छामि इति प्रथमा पिपीलिका अवदत् । आगतया पिपीलिकया सहर्षं तादृशी सहायता प्रदत्ता ।

स्वल्पः जन्तुः पिपीलिका अपि सजातीयस्य साहाय्यं करोति । तर्हि मनुष्यैः कथं न परस्परस्य साहाय्यं कर्तव्यम् ।

अष्टादशः पाठः।

उपाध्यायः।

यः कंचित् विद्याम् पाठयति स तस्य उपाध्यायः भवति । स गुरुः इति उच्यते । यः कस्यचित् पार्श्वे विद्यां पठति स तस्य शिष्यः भवति । स छात्र इति कथ्यते । विद्याम् इच्छन् बालः अक्षराणि अपि न जानन् आदौ गुरुम् उपगच्छति । तादृशं तं गुरुः महता प्रयासेन शास्त्रस्य सर्वम् अर्थं शनैः शनैः शिक्षयति । शिष्यः पाठितम् अपि अर्थं यदि पृच्छति तं तस्य उपाध्यायः पुनः पुनः उपदिशति । अहो छात्रं प्रति उपाध्यायः कियतीं क्षमां कियन्तीं दयां च करोति ।

अपि च गुरुः श्रद्धालुं शिष्यं क्रमेण विविधान् ग्रन्थान् विविधाः च विद्याः अध्यापयति । शुभेषु आचारेषु च तं प्रवर्त्तयति । एवं गुरुणा शिक्षितः बालः समयेन पण्डितः

जायते। तं एनं गुरुं शिष्यः सर्वदा सत्कुर्यात्। तस्मिन् कृतज्ञः च भवेत्।

मनुष्यः प्रशस्तैः भूषणैः अलंकृतः अपि विद्यां विना न शोभते न च पूजां लभते। तस्मात् शिष्यः विद्यायाः दातारं गुरुं पितरम् इव उपचरेत्।

एकोनविंशः पाठः ।

शरीरम् (क)

देवः—सोमदत्त ! आत्मनः शरीरस्य अङ्गानां नामानि कथय ।

मदत्तः—इदं मम शिरः । इयं मे ग्रीवा । इमौ मम हस्तौ । इदं मे वक्षः । इदम् उदरम् । इमौ ऊरू । इमे मम जंघे । इमौ च मे पादौ ।

०—आत्मनः मस्तकं कर्णौ च दर्शय ।

०—इदम् अस्ति मम मस्तकं इमौ च स्तः मम कर्णौ ।

०—आत्मनः अक्षिणी नासिकां कपोलौ च पश्य ।

०—अहम् आत्मनः अक्षिणी कपोलौ च द्रष्टुं न शक्नोमि । नासिकायाः तु कंचित् भागं पश्यामि । तव कपोलौ अक्षिणी च सम्यक् पश्यामि ।

०—आत्मनः नासिकायाः कं भागं पश्यसि ।

०—आत्मनः नासिकायाः अग्रं भागं पश्यामि ।

भू०—मुखस्य अवयवान् कथय ।

सोम—इमौ मम ओष्ठौ । इयं मे जिह्वा । इदं मे तालु

अयं कण्ठः । इमे च मम दन्ताः ।

भू०—आत्मनः स्कन्धौ दर्शय ।

सो०—इमौ मे स्कन्धौ । इमौ मे बाहू स्कन्धाभ्यां

संहितौ । इमौ कूर्परौ । इमौ मणिबन्धौ । इमौ

मे करभः ।

विंशः पाठः ।

शरीरम् (ख)

०—आत्मनः हस्तस्य अंगुलीना नामानि क्रमेण ब्रूहि ।

म०—अंगुष्ठः, तर्जनी, मध्यमा, अनामिका, कनिष्ठा इति क्रमेण अंगुलीनां नामानि सन्ति ।

०—आत्मनः पृष्ठं पश्य ।

०— अहं अक्षिणी इव आत्मनः पृष्ठमपि द्रष्टुं न शक्नोमि । तव पृष्ठं तु द्रष्टुं शक्नोमि ।

०—ऊरोः जंघायाश्च संधिस्थानस्य किं नाम ?

म—ऊरोः जंघायाश्च संधिस्थानस्य जानु इति नाम भवति ।

०— पादं जंघया किं योजयति ?

म०—पादं जंघया गुल्फः योजयति ।

०— पादयोः हस्तयोः च अंगुलीनां का संख्या ?

म—पादयोः हस्तयोः च अंगुलीनां संख्या विंशतिः भवति ।

भू०— अहो तव अंगुलीनां नखाः भृशम् अरुणाः स

नखानां आरुण्यं स्वास्थस्य सूचकं भवति।

सो०— ज्ञानेन्द्रियाणाम् उपयोगं ब्रूहि।

भू०—वयं अक्षिभ्यां रूपं पश्यामः। कर्णाभ्यां शब्दं शृ

नासिकया गन्धं जिघ्रामः। जिह्वया रसं जानीमः

त्वचया च स्पर्शं गृह्णीमः।

एकविंशः पाठः ।

अतिलोभः ।

कस्यचित् पुरुषस्य गृहे एका हंसी आसीत् । सा प्रतिदिनम् एकं सुवर्णमयम् अण्डं प्रसूते स्म । अतिलोभी स पुरुषः प्रतिदिनं एकस्य अण्डस्य प्राप्त्या न अतुष्यत् । स एकदा अचिन्तयत्—यदि अहम् इमां हंसीं हन्यां तर्हि अस्याः उदरे स्थितानि सर्वाणि सुवर्णमयानि अण्डानि एकवारम् एव प्राप्येरन् । अन्यथा तु कः जानाति कदा इयं अण्डानां प्रसवात् विरमति । ततः स क्रूरः तस्याः उदरं विदारयामास । किन्तु तत्र एकम् अपि अण्डं न दृष्टवान् । मृता सा दीना हंसी कथम् अस्मै पूर्ववत् अण्डानि दद्यात् ।

अतिलोभिनः पुरुषस्य सिद्धः अपि आयः विनश्यति । विदुषा नरेण कदा अपि अति लोभः न कर्तव्यः ।

द्वाविंशः पाठः

विपणिः।

नगरेषु बह्व्यः वीथ्यः भवन्ति। यस्यां वीथ्यां वणिजः क्रय्याणि वस्तूनि निधाय विक्रीणते सा विपणिः कथ्यते। विपणौ अनेके आपणाः भवन्ति। तत्र गोधूमाः तण्डुलाः मुद्गाः माषाः गुडः सिता शर्करा इत्यादयः आहारश्च अनुकूलाः पदार्थाः क्रेतुं शक्यन्ते। केषुचित् आपणेषु महार्घाणि विचित्राणि वस्त्राणि आभूषणानि च विक्रीयन्ते। ऋतौ ऋतौ उपयोगिनः सूत्रमयाः ऊर्णमयाः च पटाः विपणौ एव विक्रीयन्ते। ततः एव पटान् क्रीत्वा जनाः आत्मनः परिधानाय कंचुकानि इतरांश्च वस्त्राणां प्रकारान् निर्मापयन्ति। विपणिषु क्वचित् क्वचित् ईदृशाः अपि आपणाः भवन्ति यत्र सर्वप्रकाराणि वस्तूनि क्रेतुं शक्यन्ते। यदि किंचित् क्रेतव्यं भवेत् तर्हि विपणौ गन्तव्यम्।

भारते वाणिज्यस्य परमः उत्कर्षः मुम्बापुरे अस्ति। ततः अपि अधिकः वाणिज्यस्य उत्कर्षः हरिवर्षे बहुषु नगरेषु वर्त्तते। धनस्य वर्धनाय वाणिज्यं मुख्यः उपायः॥

त्रयोविंशः पाठः।

सरः।

यत्र जलं न प्रवहति अपि तु स्तब्धं तिष्ठति तत् सरः उच्यते। सरसि नद्याः कुल्यायाः वा जलम् आनीयते। बहूनि सरांसि वर्षाणां पानीयेन अपि पूर्यन्ते। बहूनां सरसां तीराणि इष्टकाभिः बद्धानि भवन्ति। यदा नद्यां जलस्य आधिक्यं भवति मेघः वा प्रचुरं वर्षति तदा सरः जलेन पूर्णं भवति। अन्यदा तत्र जलं स्वल्पं भवति। ग्रीष्मे केषुचित् सरस्सु जलस्य नाम एव न शिष्यते।

मनुष्यस्य स्नानाय पानाय च जलम् आवश्यकम् भवति। येषु ग्रामेषु नद्यः न सन्ति तत्र जनाः सरसः एव जलं पिबन्ति। पूर्णेषु सरस्सु मीनाः मण्डूका नक्राः च वसन्ति। इमे हि जन्तवः दिने दिने सरस्सु जायमानं मलं भक्षयन्ति। तेन जलं न दुष्यति। स्वल्पे जले

इमे जन्तवः म्रियन्ते। मृत्वा च पानीयं दूषयन्ति। दूषितं जलं न पातव्यम्। नापि तस्मिन् स्नातव्यम्। यस्मिन् सरसि नवं नवं जलं प्रायः न आयाति तस्य जलं स्नानादिषु न उपयोक्तव्यम्। दूषितस्य जलस्य उपयोगेन बहवः रोगाः जायन्ते।

येषु सरस्सु कमलानि विकसन्ति तेषां दर्शनम् अतीव मनोहरं भवति।

चतुर्विंशः पाठः ।

लोहः ।

श्यामः कश्चिद् धातुः लोह इति कथ्यते । तस्य अपरं नाम अयः इति । तेन ये शिल्पं कुर्वन्ति ते लोहकाराः अयस्काराः इति च कथ्यन्ते । लोहकाराः लोहेन सूचिं असिं कीलं दर्वीं तालकं कुञ्चिकां च कुर्वन्ति । पाषाणस्य भेदने शक्तः टङ्कः कर्मरी च अयसा क्रियते । लोहः स्वभावात् अति कठिनो भवति । स यदा अग्नौ परि-ताप्य किंचित् मृदुः क्रियते तदा एव अयस्काराः तस्मात् विविधानि वस्तूनि कर्तुं शक्नुवन्ति ।

घनेन हन्यमानं तप्तं अयः नमति, प्रसरति, संकुचति दीर्घं च भवति । अयसा निर्मितं उपकरणं घर्षणेन श्लक्ष्णं उज्ज्वलं जायते । अयसि मलो मुहुः उत्पद्यते । अयसः मलः मण्डूरं इति कथ्यते । शाणे निकषणात् तस्य मलः

अपगच्छति । कुशलाः शिल्पिनः अयसा विचित्रं शिल्पं कुर्वन्ति । लेखनीनां मुखानि अयसा एव क्रियन्ते । किं युष्माभिः कदाचित् लोहस्य लेखनी दृष्टा ? आम् , अस्माकं सर्वेषां लेखन्यः लोहस्य एव सन्ति ।

पञ्चविंशः पाठः

अश्वतरो गर्दभश्च ।

एकदा अश्वतरः गर्दभः च कामपि नदीं तरतः स्म। अश्वतरस्य पृष्ठे लवणस्य गर्दभस्य पृष्ठे च ऊर्णायाः भार आसीत्। अकस्मात् अश्वतरस्य भारः जलेन आप्लुतः अभवत्। तेन लवणस्य पयसि द्रवणात् स भारः लघुः अभवत्। अश्वतरः आत्मनः इदं भाग्यं गर्दभाय अवदत्। गर्दभः अचिन्तयत्—नूनं जले भारस्य क्लेदनं तस्य लघूकरणस्य उपायः वर्त्तते। ततः अपरां नदीं तरन् गर्दभः आत्मनः ऊर्णायाः भारं जले अमज्जयत् तं आर्द्रं च अकरोत्। आर्द्रः भूतः स ऊर्णायाः भारः गुरुतरः अभवत्।

यः अर्थः एकस्य उपकाराय भवति स आत्मनः अपि उपकाराय भविष्यति इति न मन्तव्यम्। बुद्ध्या विचार्य्य कस्यचिद् अर्थस्य ग्रहणं त्यागो वा कर्तव्यः।

षड्विंशः पाठः।

तक्षा।

यः दारुणि शिल्पं करोति स तक्षा भवति। असौ वाश्या क्रकचेन च काष्ठं तक्षति। वेधनिकया दारुषु यथाऽभिलषितं छिद्राणि करोति। तक्षा दारुभिः बहूनि वस्तूनि निर्मिनोति। स पेटीं मञ्चं स्नानपीठं आसन्दीं दारुभिः एव निर्मिनोति। अन्यानि अपि बहूनि उपयोगीनि उपकरणानि तक्षा दारुभिः सृजति। रुचिराः प्रतिमाः अपि तक्षाणः दारुभिः सृजन्ति। कासुचित् प्रतिमासु तक्ष्णां चातुर्य्यं शिल्पं च अवलोक्य पुरुषस्य बुद्धिः चकिता भवति। चतुराः तक्षाणः स्वप्रतिमाभिः बहु धनं अर्जयन्ति। तक्षाणः गृहाणां रचनाय उपयोगीनि कपाट-प्रभृतीनि वस्तूनि अपि दारुणा एव सृजन्ति। गृहस्य निर्माणे काष्ठं बहुलं उपयुज्यते।

दारुषु शिल्पं कर्तुं कुशलाः तक्षाणः काश्मीरेषु बहवः सन्ति । अहं एकदा काश्मीरान् गत्वा दारुणः शिल्पं द्रक्ष्यामि ।

सप्तविंशः पाठः ।

वृद्धा ।

काचित् वृद्धा आसीत् । सा जन्मनः प्रभृति अन्धा आसीत् अत एव अविवाहिता च । सा दीर्घं कालं यावत् ईश्वरस्य उपासनाम् अकरोत् । एकदा तस्याः उपासनया प्रसन्नः ईश्वरः तस्याः अग्रे आविर्भूत्वा अवदत्—वृद्धे ! प्रसन्नः अस्मि ते । वरम् एकं याचस्व । दास्यामि । सा वरम् अयाचत—अहं आत्मनः पुत्रान् सुवर्णस्य पात्रेषु क्षीरेण घृतेन च सहितं ओदनं भुञ्जानान् पश्येयम् ।

न तावत् अन्धायाः तस्याः पतिः आसीत् । कुतः पुत्राः ? कुतः गावः ? कुतः धनम् ? बुद्धिमती सा एतत् सर्वं इष्टं एकस्मिन् एव वाक्ये अयाचत ।

ततः ईश्वरः 'तथा अस्तु' इति अकथयत् । तस्याः बुद्धिं च प्राशंसत् ।

अष्टाविंशः पाठः ।

संवादः ।

उपाध्यायः— विष्णुमित्र ! किं कारणं ? अद्य त्वया स्वकीयः पाठः न स्मृतः ।

विष्णुमित्रः—आर्य सत्यम् । अद्यतनः पाठः अतीव कठिनः आसीत् ।

उपा०—अस्ति अद्यतनः पाठः पूर्वेभ्यः पाठेभ्यः कठिनः । तथापि किं कठिनस्य पाठस्य अर्थः न ज्ञातव्यः ? स्मरणं च न कर्त्तव्यम् ?

विष्णु०—न आर्य खलु एवं कथयामि । किन्तु कठिनस्य पाठस्य स्मरणाय विशेषेण परिश्रमः कर्त्तव्यः भवति । स च परिश्रमः मया गृहे न कृतः ।

उपा०—कस्मात् ?

विष्णु०— स्मरणाय पर्याप्तः समयः मया न आसादितः । पिता मां एकस्य दीर्घस्य लेखस्य प्रतिरूपणे नियो-

जितवान् । तस्य प्रतिरूपणं आत्मनः पाठस्य स्मरणं च इति उभयं मया कर्तुं न पारितम् ।

उपा०—एवं चेत्, आत्मनः कथने विश्वासाय पितुः पत्रं आनय ।

विष्णु०— तथा करोमि ।

उपा०—अस्तु, इदानीं तव एव वचने विश्वासं करोमि । त्वां च क्षमे । अपि जानासि अस्य कारणम् ?

विष्णु०—आर्य न खलु जानामि ।

उपा०— यतः त्वं मया सदा सत्यवादी दृष्टः असि ।

एकोनत्रिंशः पाठः।

अस्माकं भारतम्।

अस्माकं देशो भारतं कथ्यते। पुरा अस्मिन् भारते रामः युधिष्ठिरः चन्द्रगुप्तः विक्रमादित्यः भोजः इति बहवः राजानः राज्यं अकुर्वन्। तेषु राज्ञां उचिताः सत्यं दया न्यायः शौर्य्यं नीतिः इति एते सर्वे गुणाः आसन्। ते सर्वदा धर्मं नीतिं च अनुसरन्तः प्रजानां पुत्रवत् पालनं अकुर्वन्। तेषां राज्ये सर्वे सुखिनः आसन्। अतः एव तेषां कीर्तिं जनाः अद्यापि गायन्ति।

अथ काले गच्छति सति आर्य-मते स्थितानां राज्ञां बलं पौरुषं च क्रमेण क्षीणं अभवत्। तदा महम्मदीयाः राजानः तान् जित्वा भारतं अधीनं अकुर्वन्। तेषु बहवः राजानः धार्मिकाः न्यायस्थाः च न आसन्। ते अन्यस्मिन् मते स्थितान् जनान् बहु पीडयन्ति स्म। तैः आचरितानि दुष्टानि कर्माणि वाचा वक्तुं न शक्यन्ते।

तस्मिन् एव समये आंग्लेयानां वणिजां कश्चित् संघः बहुभिः उपायैः भारतीयानां राज्ञां साहाय्यं आसाद्य आत्मनः व्यापारं अवर्धयत् । व्यापारेण धनं धनेन बलं च अवर्धयत् । अथ कालेन धनं बलं बुद्धिं नीतिं च आश्रित्य स संघः समग्रं भारतं अधीनं अकरोत् । सप्तपंचाशत्-उत्तर अष्टादश-शत-(१८५७) तमे खीष्टस्य वर्षे आंग्लेयानां राज्ञा भारतः संघस्य सकाशात् आदत्तम् ।

भारतस्य उत्तरस्यां दिशि हिमालयः, पश्चिमस्यां अफगान-बलोच-देशौ आरव्यः सागरः, दक्षिणस्यां भारत समुद्रः; पूर्वस्यां बङ्गसागरः ब्रह्मदेशः च वर्त्तन्ते । अस्मिन् गंगा-प्रभृतयः बह्वः नद्यः प्रवहन्ति। अत्र हि सर्वे धातवः उपलभ्यन्ते । सर्वाणि अन्नानि उत्पद्यन्ते । सर्वे वृक्षाः प्ररोहन्ति । सर्वाणि च फलानि जायन्ते । सर्वाणि च रत्नानि प्राप्यन्ते । पृथिव्यां सर्वेभ्यः देशेभ्यः गरिष्ठः अस्माकम् एव देशः वर्तते । स्वदेशं मातृभूमिः इत्यपि कथयन्ति । मातृभूमेः मातुः इव वन्दना सदा सर्वैः कर्तव्या ।

त्रिंशः पाठः

नीतिः ।

मेधायाः भूषणं विद्या विद्यायाः भूषणं वचः ।
वचसः भूषणं सत्यं श्रेयः तेन हि वर्धते ॥ १ ॥
त्रीणि यस्य विशुद्धानि मनः वाणी च कर्म च ।
सुकृतं वर्धते तस्य प्रसीदन्ति च देवताः ॥ २ ॥
दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद् वाचं मनःपूतं समाचरेत् ॥ ३ ॥
किं भूषणं नराणां कीर्तिः किं कार्यमुच्यते सुकृतम् ।
किं चक्षुः सूक्ष्मा धीः का विद्या उपकुरुते या ॥ ४ ॥

[illegible] [illegible]

मुद्रक तथा प्रकाशक म० गंगाराम पाठक गुरुकुल कांगड़ी
के लिये गुरुकुल प्रेस, कनखल में छपा।